# Venkateshastotram

# વેઙ્કટેશસ્તોત્રમ્

## Document Information

Text title : veNkaTeshastotram 1

File name : venkaTeshastotram.itx

Category : vishhnu, venkateshwara, stotra, vishnu

Location : doc_vishhnu

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : Venkatesha Kavyakalapa

Latest update : April 4, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# વેઙ્કટેશસ્તોત્રમ્

કૌશિકશ્રીનિવાસાર્યતનયં વિનયોજ્જ્વલમ્ ।
વાત્સલ્યાદિગુણાવાસં વન્દે વરદદેશિકમ્ ॥

પદ્મસ્થાં યુવતીં પરાર્ધ્યવૃષભાદ્રીશાયતોરસ્સ્થલી-
    મધ્યાવાસમહોત્સવાં ક્ષણસકૃદ્વિશ્લેષવાક્યાસહામ્ ।
મૂર્તીભાવમુપાગતામિવ કૃપાં મુગ્ધાખિલાઙ્ગાં શ્રિયં
    નિત્યાનન્દવિધાયિનીં નિજપદે ન્યસ્તાત્મનાં સંશ્રયે ॥ ૧॥

શ્રીમચ્છેષમહીધરેશચરણૌ પ્રાપ્યૌ ચ યૌ પ્રાપકૌ
    અસ્મદ્દેશિકપુઙ્ગવૈઃ કરુણયા સન્દર્શિતૌ તાવકૌ ।
પ્રોક્તૌ વાક્યયુગેન ભૂરિગુણકાવાર્યૈશ્ચ પૂર્વૈર્મુહુઃ
    શ્રેયોભિઃ શઠવૈરિમુખ્યમુનિભિસ્તૌ સંશ્રિતૌ સંશ્રયે ॥ ૨॥

યસ્યૈકં ગુણમાદૃતાઃ કવયિતું નિત્યાઃ પ્રવૃત્તા ગિરઃ
    તસ્યાભૂમિતયા સ્વવાઙ્મનસયોર્વૈક્લબ્યમાસેદિરે ।
તત્તાદૃગ્બહુસદ્ગુણં કવયિતું મોહાદ્વૃષાદ્રીશ્વરં
    કાઙ્ક્ષે કાર્યવિવેચનં ન હિ ભવેન્મૂઢાશયાનાં નૃણામ્ ॥ ૩॥

યત્પાદા યોષિતં નિજસકૃત્સ્પર્શેન કાઞ્ચિચ્છિલા-
    મઙ્ગાર ડિમ્ભતામનુપમૌ શાન્તં કમપ્યઞ્ચિતૌ ।
યત્પાદૂરખિલાં શશાસ ચ મહીમાશ્ચર્યસીમાસ્થલીમ્
    અદ્રાક્ષં હરિમઞ્જનાચલતટે નિર્નિદ્રપદ્મેક્ષણમ્ ॥ ૪॥

અત્રસ્યન્મણિરાજરાજિવિલસન્મઞ્જીરનિર્યન્મહઃ-
    સ્તોમપ્રાસ્તસમસ્તવિસ્તૃતતમશ્શ્રીમન્દિરાભ્યન્તરમ્ ।
વ્યાકોચામ્બુજસુન્દરં ચરણયોર્દ્વન્દ્વં વૃષાદ્રીશિતુઃ
    ચક્ષુર્ભ્યામનુભૂય સર્વસુલભં પ્રાપ્સ્યામિ મોદં કદા ॥ ૫॥

સત્કૃત્યા સમકાલલબ્ધતનુભિર્ગોપીભિરત્યાદરાત્

વિન્યસ્તૌ વદને કુચે ચ નિતરાં રોમાઞ્ચરોહાઞ્ચિતે ।
પદ્માભૂકરપલ્લવૈઃ સચકિતં સંવાહ્યમાનૌ મૃદૂ
માન્યૌ વેઙ્કટભૂધરેશચરણૌ માર્ગે દૃશોઃ સ્તાં મમ ॥ ૬॥

પ્રાતઃ ફુલ્લપયોરુહાન્તરદલસ્નિગ્ધારુણાન્તસ્થલૌ
નિષ્પીતાખિલનીરનીરધિલસન્નીલામ્બુદાભૌ બહિઃ ।
રાકાશીતમરીચિસન્નિભનખજ્યોતિર્વિતાનાઞ્ચિતૌ
પાદૌ પન્નગપુઙ્ગવાચલપતેર્મધ્યેમનસ્સ્તાં મમ ॥ ૭॥

મન્દારપ્રસવાભિરામશિરસાં વૃન્દારકશ્રેયસાં
વૃન્દૈરિન્દુકલાભૃતા ચ વિધિના વન્ધ્યૌ ધૃતાનન્દથૂ ।
બન્ધચ્છેદવિધાયિનૌ વિનમતાં છન્દશ્શતાભિષ્ટુતૌ
વન્દે શેષમહીધરેશચરણૌ વન્દારુચિન્તામણી ॥ ૮॥

ચિઞ્ચામૂલકૃતાસનેન મુનિના તત્ત્વાર્ધસન્દર્શિના
કારુણ્યેન જગદ્ધિતં કથયતા સ્વાનુષ્ઠિતિરવ્યાપનાત્ ।
નિશ્ચિક્યે શરણં યદેવ પરમં પ્રાપ્યં ચ સર્વાત્મનાં
તત્પાદાબ્જયુગં ભજામિ વૃષભક્ષોણીધરાધીશિતુઃ ॥ ૯॥

નન્દિષ્યામિ કદાઽહમેત્ય મહતા ઘર્મેણ તપ્તો યથા
મન્દોદઞ્ચિતમારુતં મરુતલે મર્ત્યો મહાન્તં હ્રદમ્ ।
સન્તપ્તો ભવતાપદાવશિખિના સર્વાર્તિસંશામકં
પાદદ્વન્દ્વમહીશભૂધરપતેર્નિર્દ્વન્દ્વહૃન્મન્દિરમ્ ॥ ૧૦॥

યૌ વૃન્દાવનભૂતલે વ્યહરતાં દૌતેયવૃન્દાવૃતે
કુપ્યત્કાલિયવિસ્તૃતોચ્છ્રિતફણારઙ્ગેષુ ચાનૃત્યતામ્ ।
કિઞ્ચાનસ્સમુદાસ્થતાં કિસલયપ્રસ્પર્ધિનાવાસુરં
તન્વાતાં મમ વેઙ્કટેશચરણૌ તાવંહસાં સંહૃતિમ્ ॥ ૧૧॥

શેષિત્વપ્રમુખાન્નિપીય તુ ગુણાન્નિત્યા હરેસ્સૂરયો
વૈકુણ્ઠે તત એત્ય વેઙ્કટગિરિં સૌલભ્યમુખ્યાનિહ ।
નિત્યોદઞ્ચિતસંનિધેર્નિરુપમાન્નિર્વિશ્ય તસ્યાદ્ભુતાન્
નિર્ગન્તું પ્રભવન્તિ હન્ત ન તતો વૈકુણ્ઠકુણ્ઠાદરાઃ ॥ ૧૨॥

સમ્ફુલ્લાદ્ભુતપુષ્પભારવિનમચ્છાખાશતાનાં સદા
સૌરભ્યાનુભવાભિયન્મધુલિહાં સઙ્ઘૈર્વૃતે ભૂરુહામ્ ।
ઉદ્યદ્રશ્મિભિરુજ્જ્વલૈર્મણિગણૈરુત્તુઙ્ગશૃઙ્ગૈર્વૃષ-

ક્ષોણીભર્તરિ વર્તતેઽખિલજગત્ક્ષેમાય લક્ષ્મીસખઃ ॥ ૧૩॥

નાનાદિઙ્મુખવાસિનો નરગણાનભ્યાગતાનાદરાત્
પ્રત્યુદ્યાત ઇવાન્તિકસ્ફુટતરપ્રેક્ષ્યપ્રસન્નાનનઃ ।
સાનુક્રોશમનાસ્સડિમ્ભમહિલાન્ સમ્પ્રાપ્તસર્વેપ્સિતાન્
કુર્વન્નઞ્જનભૂધરે કુવલયશ્યામો હરિર્ભાસતે ॥ ૧૪॥

આપાદાદનવદ્યમાચ શિરસસ્સૌન્દર્યસીમાસ્પદં
હસ્તોદઞ્ચિતશઙ્ખવક્રમુરસાં બિભ્રાણમમ્ભોધિજામ્ ।
માલ્યૈરુલ્લસિતં મનોજ્ઞમકુટીમુખ્યૈશ્ચ ભૂષાશતૈઃ
મધ્યેતારણમઞ્જનાચલતટે ભાન્તં હરિં ભાવયે ॥ ૧૫॥

મઞ્જીરાઞ્ચિતપાદમદ્ભુતકટીવિભ્રાજિપીતામ્બરં
પદ્માલઙ્કૃતનાભિમઙ્ગમહસા પાથોધરભ્રાન્તિદમ્ ।
પાર્શ્વાલઙ્કૃતિશઙ્ખચક્રવિલસત્પાણિં પરં પૂરુષં
વન્દે મન્દહસં વિચિત્રમકુટીજુષ્ટં વૃષાદ્રીશ્વરમ્ ॥ ૧૬॥

નાનાભાસુરરત્નમૌક્તિકવરશ્રેણીલસત્તોરણ-
સ્વર્ણસ્તમ્ભયુગાન્તરાલકભૃશપ્રદ્યોતમાનાનનમ્ ।
આનાસશ્રુતિલોલનીલવિશદસ્નિગ્ધાન્તરક્તોક્ષણં
નાથં પ્રેક્ષિતુમઞ્જનાચલતટે નાલં સહસ્રં દૃશામ્ ॥ ૧૭॥

ચક્રાબ્જે કરયુગ્મકેન સતતં બિભ્રત્ કરેણ સ્પૃશન્
સવ્યેનોરુમપીતરેણ ચરણૌ સન્દર્શયન્ ભૂષણૈઃ ।
સદ્રત્નૈઃ સકલા દિશો વિતિમિરાઃ કુર્વન્ વૃષાદ્રૌ હરિઃ
શુદ્ધસ્વાન્તનિષેવિતે વિજયતે શુદ્ધાન્તબાહાન્તરઃ ॥ ૧૮॥

સુસ્નિગ્ધાધરપલ્લવં મૃદુહસં મીનોલ્લસલ્લોચનં
ગણ્ડપ્રસ્ફુરદંશુકુણ્ડલયુગં વિભ્રાજિસુભ્રૂન્નસમ્ ।
ફાલોદ્ભાસિપરાર્ધ્યરત્નતિલકં વક્ત્રં પ્રલમ્બાલકં
ભવ્યં વેઙ્કટનાયકસ્ય પિબતાં ભાગ્યં ન વાચાં પદમ્ ॥ ૧૯॥

ત્વત્પાદામ્બુજસસ્પૃહં મમ મનઃ કુર્યાસ્ત્વદન્યસ્પૃહાં
દૂરં તોલય દુઃખજાલજનનીં ત્વત્પાદવાઞ્છાદ્વિષમ્ ।
કિઞ્ચ ત્વત્પરતન્ત્રભૂસુરકૃપાપાત્રં ક્રિયા માં સદા
સર્પાધીશ્વરભૂધરેન્દ્ર ભગવન્ સર્વાર્થસન્દાયક ॥ ૨૦॥

નાકાર્ષં શ્રુતિચોદિતાં કૃતિમહં કિઞ્ચિન્ન ચાવેદિષં
    જીવેશૌ ભવભઞ્જની ન ચ ભવત્પાદાબ્જભક્તિર્મમ ।
શ્રીમત્ત્વત્કરુણૈવ દેશિકવરોપજ્ઞં પ્રવૃત્તા મયિ
    ત્વત્પ્રાપ્તૌ શરણં વૃષાચલપતેઽભૂવં તતસ્ત્વદ્ભરઃ ॥ ૨૧॥

શ્રીમત્કૌશિકવંશવારિધિવિધોઃ શ્રીવેઙ્કટેશાખ્યયા
    વિખ્યાતસ્ય ગુરોર્વિશુદ્ધમનસો વિદ્યાનિધેઃ સૂનુના ।
ભક્ત્યૈતાં વરદાભિધેન ભણિતાં શ્રીવેઙ્કટેશસ્તુતિં
    ભવ્યાં યસ્તુ પઠેદમુષ્ય વિતરેચ્છ્રેયઃ પરં શ્રીસખઃ ॥

॥ ઇતિ વેઙ્કટેશસ્તોત્રમ્ ॥

શ્રીમતે રામાનુજાય નમઃ

From a telugu book veNkaTeshakAvyakalApa
Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

*Venkateshastotram*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*